Reg. No. : ....................................

Name : ........................................

**Code No. 9005**

**Second Year – March 2018**

Time : 2½ Hours
Cool-off time : 15 Minutes

Part – II

## SANSKRIT

Maximum : 80 Scores

***General Instructions to Candidates :***

- There is a 'Cool-off time' of 15 minutes in addition to the writing time.
- Use the 'Cool-off time' to get familiar with questions and to plan your answers.
- Read questions carefully before answering.
- Read the instructions carefully.
- Calculations, figures and graphs should be shown in the answer sheet itself.
- Give equations wherever necessary.
- Electronic devices except non-programmable calculators are not allowed in the Examination Hall.

निर्देशा :

1. सर्वे प्रश्ना: समाधेया: ।
2. प्रश्नान् प्रश्ननिर्देशान् च सावधानं पठित्वा उत्तरतय ।
3. प्रश्नानां वाचनाय 15 निमेषा: कल्पिता: ।

1. अधो निर्दिष्टेषु प्रश्नेषु पञ्चानाम् उत्तराणि कोष्ठकात् निर्धार्य लिखत । (Scores : 1 × 5 = 5)

(1) गीतगोविन्दस्य कर्ता कः ?

(जयदेवः, व्यासः, कालिदासः)

(2) कार्यालयस्य देहल्यां स्थाणुम् अवलम्ब्य उपविशति । का ?

(स्नुषा, रोसी, वृद्धमाता)

(3) श्रीबुद्धस्य भार्या का ?

(यशोधरा, सुषमा, सीता)

(4) सुप्रसिद्धः कूटियाट्टकलाकारः कः ?

(वासुदेवपणिक्करः, पी.के. नारायणन् नम्प्यार्, श्रीकुमारः)

(5) सङ्गणकीय-भाषाविज्ञाने प्रमुखं स्थानं कल्पिता भाषा का ?

(संस्कृतं, मलयालम्, कन्नटा)

(6) स्पृशति मां भृत्यभावेन कौटिल्यशिष्यः । अत्र कौटिल्यशिष्यः कः ?

(चन्द्रगुप्तः, अमात्यः, नन्दराजः)

(7) स्मृतिभ्रंशात् किं भवति ?

(क्रोधः, सम्मोहः, बुद्धिनाशः)

2. अधः प्रदत्तयोः एकस्य उत्तरं लिखत । (Scores : 6)

(क) प्रदत्तं गीतं पठित्वा आस्वादनटीकां लिखत ।

दिशि दिशि किरति सजलकणजालम् ।

नयननलिनमिव विगलितनालम् ।।

(सूचना :- जयदेवः, गीतगोविन्दं, विरहातुरा राधिकायाः अवस्था, केशवदर्शनकांक्षया सर्वासु दिक्षु प्रसरति)

(ख) 'क' विभागात् प्रदत्तस्य आशयस्य अनुयोज्यं गीतं 'ख' विभागात् चित्वा लिखत ।

| | क | ख |
|---|---|---|
| 1. | राधा हरिरिति सकामं जपति । | सरसमसृणमपि मलयजपङ्कं ।<br>पश्यति विषमिव वपुषि सशङ्कम् ।। |
| 2. | श्वसितपवनं मदनदहनमिव वहति । | हरिरिति हरिरिति जपति सकामं ।<br>विरहविहितमरणेव निकामम् ।। |
| 3. | मलयजपङ्कं विषमिव पश्यति । | श्वसितपवनमनुपमपरिणाहं ।<br>मदनदहनमिव वहति सदाहम् ।। |

**3. प्रदत्तं गद्यभागं पठित्वा अधोनिर्दिष्टानां प्रश्नानाम् उत्तराणि लिखत ।**

अहो ! वृक्षराजः अस्मान्रक्षत् इति संचिन्त्य सर्वे समाश्वस्ताः । अस्तमुपगते भास्वति प्रत्यागतौ पितरौ कृतज्ञतापूर्वं वृक्षराजम् अनमताम् । वृक्षस्य आर्द्रता सर्वदा मातुः स्पर्शमिव आश्वासदायिनी अभवत् ।

तस्याः मनोमुकुराः पुनः पुनः घटनाः प्रतिफालयन् अवर्तत ।

प्रातः निर्झर्याः कलरवं श्रुत्वा, शाखामृगाणां लाङ्गूलान्दोलनं च दृष्ट्वा, शाखायां मन्दं मन्दं आन्दोलयन्ती अहं व्याधस्य लक्ष्यमभवम् । वृक्षस्य अधः कोटरवासी कश्चन सर्पः व्याधस्य पादयोरन्तरेण झटिति असरत् । विगलितलक्ष्यस्य व्याधस्य शरेण वृक्षः विद्धः । यद्यपि अहं रक्षिता तथापि विषबाधितः अयं वृक्षः क्रमेण नाशोन्मुखोऽभवत् । एकं वृक्षं त्यक्त्वा मम बान्धवाः पक्षिणश्च सर्वे गताः । किन्तु अहं कुत्रापि न गच्छामि ।

प्रश्नाः (क) वृक्षस्य आर्द्रता कीदृशः अभवत् ? (Scores : 2)

(ख) वृक्षः कथं नाशोन्मुखः अभवत् ? (Scores : 2)

(ग) प्रदत्तं गद्यांशं संगृह्य स्ववाक्यैः लिखत । (Scores : 5)

(घ) गद्यभागं पठित्वा उचितशीर्षकं लिखत । (Score : 1)

4. **अधो निर्दिष्टेषु प्रश्नेषु एकस्य उत्तरं निर्धार्य लिखत ।** **(Scores : 6)**

(क) प्रदत्तं गद्यभागं पठित्वा पटकथामेकां लिखत ।

"गुरुदेव ! मर्षयन्तु भवन्तः अपराधिने चोराय दण्डनमिति सामाजिकीं व्यवस्थां अनुसृत्य आवेदनम् अदाम" इति । स्मयमानः गुरुः तान् प्रत्यवदत् । "सोऽयं दरिद्रः एवं वक्तव्यः आसीत् यदि दिवा आगमिष्यत् चेत् समस्तं कदलीफलगुञ्जं अदास्यत् ।"

(ख) श्रीनारायणगुरुदेवस्य मानवस्नेहं प्रतिफलन्तं एकं जीवितसन्दर्भं लघुटिप्पणीरूपेण लिखत ।

(सूचना : – श्रीनारायणगुरुदेवेन स्थापितः मठः । मठस्य नातिदूरे कदलीवनमवर्तत । कश्चन कदलीफलगुञ्जं मुषित्वा अगच्छत् । चोरं बन्धनं करोति । न्यायाधिपः शिक्षाम् अदण्डयत् । गुरुः खिन्नः मानसः अभवत् ।

5. **श्लोकं पठित्वा गद्यक्रमं पूरयत ।** **(Scores : 4)**

श्लोकः – दृष्ट्वा चिन्तारतं क्षिप्रग्राहिणं बालकं मुनिः ।
प्रियामाचष्ट तद्वृत्तं सा तु मौनमधारयत् ।।

गद्यक्रमः – क्षिप्रग्राहिणं बालकं – मुनिः – प्रियां – सा तु – अधारयत् ।

6. **प्रादेशिकभाषया आङ्गलभाषया वा अनुवदत ।** **(Scores : 5)**

शुद्धोधनस्य मायादेव्याः च पुत्रः आसीत् सिद्धार्थः । मानवानां दुःखनिवृत्तये सिद्धार्थः गृहात् अगच्छत् । सः महत्या तपस्यया पारमार्थिकं बोधम् अलभत । क्रमेण सः गौतमबुद्धः नाम्ना प्रसिद्धः अभवत् । गौतम बुद्धस्य मार्गः बौद्धधर्मः नाम्ना प्रसिद्धः ।

7. खण्डिकां पठित्वा पद्मश्री पी.के. नारायणन् नम्प्यार् महोदयस्य जीवचरित्ररेखां (Profile) लिखत । **(Scores : 6)**

पद्मश्री पी.के. नारायणन् नम्प्यार् महोदयः पालक्काट् जिल्लायां लाक्किटि नाम ग्रामे किल्लिकुरिश्शिमङ्ङलं भवने 27-5-1926 तिथौ जनिमलभत । तस्य पितरौ पद्मश्री माणिमाधवचाक्यार् श्रीदेवीनङ्यारम्मा च । कूटियाट्टम्, नङ्यार्कूत्त्, पाठकम् इत्यादि कर्ममण्डलेषु सः शोभितवान् । अन्तकवधं, श्रीकृष्णचरितं, नङ्यार्कूत्त्, मन्त्राङ्कम् इत्यादि ग्रन्थाः तेन विरचिताः । पद्मश्री, नृत्तनाट्यपुरस्काराश्च तेन प्राप्ताः ।

नाम –

देशः –

जननम् –

पितरौ –

कर्ममण्डलाः –

रचनाः –

8. पेटिकातः कूटियाट्टसम्बन्धीनि **त्रीणि** पदानि चित्वा लिखत । **(Scores : 3)**

1. __________ ।

2. __________ ।

3. __________ ।

| मुडियक्कित्ता, संस्कृतरूपकाणि, चेण्डा मणिप्रवालम्, मिषाव् |
|---|

9. उदाहरणानुसारं रिक्तस्थानानि पूरयत । **(Scores : 2)**

उदा. – सीता गायति । सीता अगायत् ।

(क) बालुः क्रीडति । _______ ।

(ख) चन्द्रिका पठति । _______ ।

10. उदाहरणानुसारं पदच्छेदं लिखत । (Scores : 2)

उदा – अत्र + एव = अत्रैव ।

(क) _____ + _____ = तत्रैव ।

(ख) _____ + _____ = ममैव ।

**11.** संस्कृत भाषायाम् अनुवदत । (Scores : 3)

(1) കേരളീയ സംസ്കൃത നാടകാഭിനയം ആണ് കൂടിയാട്ടം.

(Kootiyattam is the Keralite Sanskrit theatre art form.)

(2) സംസ്കൃതം എല്ലാ ഭാരതീയ ഭാഷകളുടെയും ജനനി ആണ്.

(Sanskrit is the mother of all Indian Languages.)

(3) പാണിനി എഴുതിയ സംസ്കൃത വ്യാകരണ ഗ്രന്ഥമാണ് അഷ്ടാദ്ധ്യായി.

(Ashtadhyayi is the Sanskrit grammatical work written by Panini)

12. यथोचितं योजयत । (Scores : 5)

| क | ख |
|---|---|
| राजा | नाटकसङ्केतः |
| अमात्यः | विशाखदत्तः |
| स्वगतम् | चन्द्रगुप्तः |
| चाणक्यः | राक्षसः |
| मुद्राराक्षसम् | अर्थशास्त्रम् |

13. श्लोकं पठित्वा प्रश्नानाम् उत्तराणि लिखत । (Scores : 6)

श्लोकः - ध्यायतो विषयान् पुंसः सङ्गस्तेषूपजायते ।

सङ्गात्सञ्जायते कामः कामात्क्रोधोऽभिजायते ।।

प्रश्नाः (क) सङ्गात् कः संजायते ?

(ख) विषयान् ध्यायतः पुंसः किम् उपजायते ?

(ग) श्लोकस्य आशयं स्ववाक्यैः लिखत ।

14. प्रदत्तं वाक्यं पठित्वा क्वान्त-ल्यबन्त – तुमुन्नन्तपदानि चित्वा लिखत । (Scores : 3)

शिष्यः न्यायाधिपम् उपगम्य वृत्तान्तम् अमुं न्यवेदयत् । एतत् श्रुत्वा तं न्यायाधिपः, स्वेच्छया गन्तुम् अनुजज्ञे ।

क्वान्तं – ______ ।

ल्यबन्तं - ______ ।

तुमुन्नन्तं ______ ।

15. अधोदत्तां खण्डिका पठित्वा आङ्गलयपदानां स्थाने पेटिकातः संस्कृतपदानि उपयुज्य यात्राविवरणं पुनर्लिखत । (Scores : 6)

अस्मिन् In the Year वयं पठनयात्रार्थं केरलकलामण्डलं गतवन्तः । प्रातः 6 O'clock वयं बस् थाने विद्यालयात् यात्राम् आरब्धवन्तः । In the morning बालसूर्यस्य स्वर्णकिरणानि दृष्ट्वा कोणार्कक्षेत्रम् अस्माकं स्मृतिपथमागतम् । तस्मिन् समये रथ्यायां थानानां आधिक्यः नासीत् । नववादने वयं कलामण्डलं प्रविष्टवन्तः । तत्र Teacher कूटियाट्टं वाद्योपकरणानि च अधिकृत्य with example विशदयति स्म । एवं विज्ञानप्रदम् आसीत् अस्माकं Study Tour.

| |
|---|
| प्रभाते, पठनयात्रा, वर्षे, षट्वादने,सोदाहरणं, आचार्यः |

16. अधोदत्तयो प्रश्नयोः **एकस्य** उत्तरं लिखत । (Scores : 6)

(क) खण्डिकां पठित्वा **त्रीणि** प्रश्नवाक्यानि रचयत ।

लोके विविधाः भाषाः उपयुज्यन्ते । ज्ञानस्य स्वीकारः, संवेदनमिति प्रक्रिया भाषाद्वारा क्रियते । भारतीय-भाषाविज्ञानं पाणिनीयव्याकरणशास्त्रे अधिष्ठितं भवति । सङ्गणकीय-भाषाविज्ञाने अनुयोज्या भवति संस्कृतम् ।

(कथं, कुत्र, किं, का)

(ख) प्रतिदिनजीवितचर्यायां योगशास्त्रस्य प्राधान्यम् अधिकृत्य लघु उपन्यासं लिखत ।

सूचना : पतञ्जलिः – योगसूत्रम्, मनोनियन्त्रणम्, इन्द्रियाणां मनसः च आरोग्यम्, उपबोधमनसः परिवर्तनम्, एकाग्रता, व्यक्तित्वविकासः,योगदिनाचरणम् ।

17. रेखाङ्कितपदानां स्थाने समानार्थकपदानि चित्वा लिखत । (Scores : 2)

अमात्यराक्षस, गृह्यतामिदं <u>शस्त्रम्</u> । एतत् <u>श्रुत्वा</u> राक्षसः एवं प्रत्यवदत् ।

(निशम्य, किरीटः, आयुधम्)

---